শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শঙ্করেণ প্রোক্তং

# ॥ শ্রী মন্ত্ররাজপদস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী মন্ত্ররাজপদস্তোত্রম্ ॥

শ্রী ঈশ্ৱর উৱাচ

ৱৃত্তোৎফুল্ল ৱিশালাক্ষং ৱিপক্ষক্ষযদীক্ষিতম্।
নিনাদত্রস্তৱিশ্ৱাণ্ডং ৱিষ্ণুং উগ্রং নমাম্যহম্॥ **1** ॥

সর্ৱৈরৱধ্যতাং প্রাপ্তং সবলৌঘং দিতেঃ সুতম্।
নখাগ্রৈঃ শকলীচক্রে যস্তং ৱীরং নমাম্যহম্॥ **2** ॥

পদাৱষ্টব্ধপাতালং মূর্ধাৱিষ্টত্রিৱিষ্টপম্।
ভুজপ্রৱিষ্টাষ্টদিশং মহাৱিষ্ণুং নমাম্যহম্॥ **3** ॥

জ্যোতীংষ্যর্কেন্দু নক্ষত্রজ্ৱলনাদীন্যনুক্রমাৎ।
জ্ৱলন্তি তেজসা যস্য তং জ্ৱলন্তং নমাম্যহম্॥ **4** ॥

সর্ৱেন্দ্রিযৈরপি ৱিনা সর্ৱং সর্ৱত্র সর্ৱদা।
যো জানাতি নমাম্যাদ্যং তমহং সর্ৱতোমুখম্॥ **5** ॥

নরৱৎ সিংহৱচ্চৈৱ যস্য রূপং মহাত্মনঃ।
মহাসটং মহাদংষ্ট্রম্ তং নৃসিংহং নমাম্যহম্॥ **6** ॥

যন্নামস্মরণাদ্ ভীতাঃ ভূতৱেতালরাক্ষসাঃ।
রোগাদ্যাশ্চ প্রণশ্যন্তি ভীষণং তং নমাম্যহম্॥ **7** ॥

সর্ৱোঽপি যং সমাশ্রিত্য সকলং ভদ্রমশ্নুতে।
শ্রিযা চ ভদ্রযা জুষ্টঃ যস্তং ভদ্রং নমাম্যহম্॥ **8** ॥

সাক্ষাৎ স্বকালে সংপ্রাপ্তং মৃত্যুং শত্রুগণান্বিতম্।
ভক্তানাং নাশযেদ্ যস্তু মৃত্যুমৃত্যুং নমাম্যহম্॥ **9**॥

নমস্কারাত্মকং যস্মৈ ৱিধাযাঽঽত্মনিৱেদনম্।
ত্যক্তদুঃখোঽখিলান্ কামান্ অশ্নন্তং তং নমাম্যহম্॥ **10**॥

দাসভূতাঃ স্বতস্সর্ৱে হ্যাত্মানঃ পরমাত্মনঃ।
অতোঽহমপি তে দাসঃ ইতি মৎৱা নমাম্যহম্॥ **11**॥

শঙ্করেণাঽঽদরাৎ প্রোক্তং পদানাং তত্ত্বনির্ণযম্।
ত্রিসন্ধ্যং যঃ পঠেৎ তস্য শ্রীর্ৱিদ্যাঽঽযুশ্চ ৱর্ধতে॥ **12**॥

॥ শ্রী মন্ত্ররাজপদস্তোত্রং সমাপ্তম্॥